# राष्ट्रवन्दनम्

**डॉ. विश्वासः**



यत्र प्रवहति विमला गङ्गा
यत्र पवित्रं वेदश्रवणम्,
तत्र पावने भारतदेशे
भवतान्मम जन्म, भवतान्मम जन्म ।।

यत्र बालगङ्गाधरतिलकः
स्वराज्यशपथं घोषितवान् ।
यत्राहिंसां गान्धिमहात्मा
स्वतन्त्रतासाधनमकरोत् ।।

यत्र रवीन्द्रो मधुरं गानं
राष्ट्रसमुत्तेजकमतनोत् ।
तत्र पावने भारतदेशे
भवतान्मम जन्म, भवतान्मम जन्म ।।

यत्र समस्तं मतं समानं
मनुजाः सर्वे सहोदराः ।
यत्र विचारविहङ्गोत्पतने
न भवति काऽपि परिसीमा ।

यत्र च धर्मे न्याये च जनो
हृत्सङ्कल्पः प्रवर्तते,
तत्र पावने भारतदेशे
भवतान्मम जन्म, भवतान्मम जन्म ।।

| |
|---|
| **गङ्गा, भारतदेशः, स्वराज्यशपथं, स्वतन्त्रता, मनुजाः, पावनम्, जन्म, सहोदराः** |

# टिप्पणी

**शब्दार्थ : -**

विमला - निर्मला (ପରିଷ୍କୃତା), मनुजाः - मनुष्याः (ମନୁଷ୍ୟମାନେ), विचारविहङ्ग - विचाररूपकपक्षी (ବିଚାର ରୂପକ ପକ୍ଷୀ), उत्पतने - उड्डयने (ଉଡ଼ିବାରେ), परिसीमा - सीमारेखा (ସୀମାରେଖା), भवतात् - भवतु (ହେଉ) ।

## अभ्यास :

१. **पद्यमिदं सस्वरं गायत ।**

२. **शून्यस्थानं पूरयत ।**

(क) यत्र पवित्रं ______________________ ।

(ख) ______________________ शपथं घोषितवान् ।

(ग) स्वतन्त्रता ______________________ ।

(घ) तत्र पावने ______________________ ।

(ङ) ______________________ मतं समानम् ।

(च) न भवति काऽपि ______________________ ।

(छ) ______________________ प्रवर्तते ।

(ज) यत्र च धर्मे ______________________ ।

३. **स्तम्भद्वयं योजयत ।**

| **'क'** | **'ख'** |
| --- | --- |
| यत्र रवीन्द्रो | विमला गङ्गा |
| स्वराज्यशपथं | भारतदेशे |
| यत्र प्रवहति | सहोदराः |
| तत्र पावने | प्रवर्तते |
| मनुजाः सर्वे | घोषितवान् |
| हृत्संकल्पः | मधुरं गानम् |

४. **पद्यानुसारं सज्जीकुरुत ।**

(क) बालगङ्गाधर यत्र तिलकः ______________________

(ख) घोषितवान् स्वराज्यशपथम् ______________________

(ग) भवति न कापि परिसीमा ______________________

(घ) जनो न्याये च धर्मे यत्र च ______________________

(ङ) वेदश्रवणं पवित्रं यत्र ______________________

(च) समस्तं यत्र समानं मतम् ______________________

(छ) भारतदेशे पावने तत्र ______________________

(ज) सहोदराः सर्वे मनुजाः ______________________

•